**श्रीमदय्यप्पसुप्रभातम्**

श्रीहरिहरसुप्रजा शास्तः पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल दातव्यं तव दर्शनम् ॥ १॥

उत्तिष्ठोत्तिष्ठ शबरीश उत्तिष्ठ शान्तिदायक ।
उत्तिष्ठ हरिहरपुत्र त्रैलोक्यं मङ्गळं कुरु ॥ २॥

गुरो समस्तजगतात्मन् क्लेशहारे -
भक्तहृद्विहारिणे मनोहरदिव्यमूर्ते ।
हे स्वामिन् भक्तजनप्रिय दानशील
श्रीशबरीपीठाश्रमस्थानिने तव सुप्रभातम् ॥ ३॥ (पीठाश्रमस्थगुरवे)

तव सुप्रभातं मित्ररक्षक भवतु प्रसन्न मन्मथसुन्दर (हे भक्तरक्षक)
ब्रह्माविष्णुशिवात्मैक्यस्वरूप -
श्रीशबरीपीठाश्रमस्थानिने तव सुप्रभातम् ॥ ४॥ (पीठाश्रमस्थगुरवे)

इति श्रीमदय्यप्पसुप्रभातं सम्पूर्णम् ।

**श्रीशास्तृ(अय्यप्प) सुप्रभातम्**

मोहिनीसुप्रजा शास्तः पूर्वासन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १॥

उत्तिष्ठोत्तिष्ठ शबरीश उत्तिष्ठ व्याघ्र/गजवाहन ।
श्रीपूर्णपुष्कलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥ २॥

शास्तः समस्तजगतां महिषीनिहन्तः
श्रितहृद्विहारि मनोहरदिव्यमूर्ते ।
श्रीस्वामिन् श्रितजनप्रिय दानशील
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ३॥

तव सुप्रभातमरविन्दलोचन
भव सुप्रसन्नमुखचन्द्रमण्डल ।
ऋषिसिद्धदेवप्रमुखैः समर्चित
शबरिशैलनाथ शरणं दयानिधे ॥ ४॥

प्रातः प्रबुद्धऋषयस्समुपास्य सन्ध्यां
आकाशसिन्धुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ५॥

अब्जानन हरिहरोद्भव सुन्दराङ्ग

त्वद्विक्रमादिचरितं विबुधाः स्तुवन्ति ।

भाषापतिः पठति वासरशुद्धिमारात्

श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ६॥

ईषत्प्रफुल्लसरसीरुहनारिकेल-

पूगद्रुमादि सुमनोहरपालिकानाम् ।

आवाति मन्दमनिलः सहदिव्यगन्धैः

श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ७॥

उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः

पात्रावशिष्टकदलीफलपायसानि ।

भुक्त्वा सलीलमथ केलिशुकाः पठन्ति

श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ८॥

भृङ्गावली च मकरन्दरसानुविद्ध-

झङ्कारगीतनिनदैः सह सेवनाय ।

निर्यात्युपान्तसरसीकमलोदरेभ्यः

श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ९॥

पद्मेशमित्रशतपत्रगतालिवर्गाः

हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।
भेरीनिनादमिव भिभ्रति तीव्रनादं
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १०॥

श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीधर्मशास्त(ः) जगदेकदयैकसिन्धो ।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ ११॥

सेवापरा ऋषिसुरेशकृशानुधर्म-
रक्षोऽम्बुनाथपवमानधनाधिनाथाः ।
बद्धाञ्जलिप्रविलसन्निजशीर्षदेशाः
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १२॥

सूर्येन्दुभौमबुधवाक्पतिकाव्यसौरि-
स्वर्भानुकेतुदिविषत्परिषत्प्रधानाः ।
त्वत्पाददर्शनायात्युत्सुकाः प्रतीक्षन्
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १३॥

त्वत्पादधूलिभरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्गनिरपेक्षनिजान्तरङ्गाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते

श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १४॥

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १५॥

श्रीशबरिनायक दयादिगुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन् नृदैवतगणादिभिरर्चिताङ्घ्रे
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १६॥

श्रीशबरिनाथ पुरुषोत्तम देवदेव
श्रीभूतनाथ शिवपुत्रक दीनबन्धो ।
मृगयाप्रिय शरणागतपारिजात
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १७॥

कन्दर्पदर्पहरसुन्दर दिव्यमूर्ते
कान्तारवास विपुलाक्ष दयाऽऽर्द्रचित्त ।
कल्याणनिर्मलगुणाकर दिव्यकीर्ते
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ १८॥

एलालवङ्गघनसारसुगन्धितीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।
धृत्वाद्य वैदिकशिखामणयः प्रहृष्टाः
तिष्ठन्ति शत्रुदमन तव सुप्रभातम् ॥ १९॥

भास्वानुदेति विकचानि सरोरुहाणि
सम्पूरयन्ति निनदैः ककुभो विहङ्गाः ।
त्वत्प्रियजनाः सततमर्थितमङ्गलास्ते
धामाश्रयन्ति तव शुभङ्कर सुप्रभातम् ॥ २०॥

शबरीनिवास निरवद्यगुणैकसिन्धो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्यनिजवैभवभक्तभोग्य
श्रीशबरिनाथगुरवे तव सुप्रभातम् ॥ २१॥

इत्थं शबरिशैलपतेरिह सुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥ २२॥

इति श्रीशास्तृ(अय्यप्प)सुप्रभातं सम्पूर्णम् ॥